इत्यारभ्य यावद् 'उणादयो बहुलम्' (३. ३. १/३१६९) इति वर्तमाने [1]प्रत्यया उक्ताः, ते भूतभविष्यतोर्विधीयन्ते । कदा देवदत्त आगतोऽसि ? अयमागच्छामि । आगच्छन्तमेव मां विद्धि । [2]अयमागमम् । [3]एषोऽस्मि आगतः । कदा देवदत्त गमिष्यसि ? एष गच्छामि । गच्छन्तमेव मां विद्धि । [4]एष गमिष्यामि । [5]गन्तास्मि । वत्करणं सर्वसादृश्यार्थम् । येन विशेषणेन [6]वर्तमाने प्रत्ययाः विहिताः [7]प्रकृत्योपपदोपाधिना तथैवात्र[8] भवन्ति । पवमानः । यजमानः । अलङ्करिष्णुः । सामीप्यग्रहणं किम् ? विप्रकर्षविवक्षायां मा भूत्, परुदगच्छत् पाटलिपुत्रम् । वर्षेण[9] गमिष्यति ।

[10]यो मन्यते गच्छामीति पदं [11]वर्तमाने काले एव वर्तते, [12]कालान्तरगतिस्तु वाक्याद् भवति, न च वाक्यगम्यः कालः [13]पदसंस्कारवेलायामुपयुज्यते इति [14]तादृशं [15]वाक्यार्थप्रतिपत्तारं प्रति प्रकरणमिदं नारभ्यते । तथा च श्वः करिष्यति, वर्षेण [16]गमिष्यति इति सर्वमुपपद्यते ॥

## आशंसायां भूतवच्च । (१३२/२७९०)

वा इत्येव । वर्तमानसामीप्ये इति[17] नानुवर्तते । आशंसनमाशंसा, अप्राप्तस्य [18]प्रियार्थस्य [19]प्राप्तुमिच्छा । तस्याश्च [20]भविष्यत्कालो विषयः । तत्र भविष्यति काले आशंसायां गम्यमानायां [21]धातोः वा भूतवत् प्रत्यया भवन्ति, [22]चकाराद् वर्तमानवच्च । उपाध्यायश्चेदागमत्, आगतः, आगच्छति, आगमिष्यति, [23]एते व्याकरणमध्यगीष्महि, एते व्याकरणमधीतवन्तः, [24]अधीमहे, [25]अध्येष्यामहे । सामान्यातिदेशे[26] [27]विशेषानतिदेशाल् [28]लङलिटौ न भवतः । आशंसायाम् इति किम् ? [29]आगमिष्यति ॥

## क्षिप्रवचने लृट् । (१३३/२७९१)

[30]आशंसायाम् इत्येव । क्षिप्रवचने उपपदे आशंसायां गम्यमानायां धातोः लृट् प्रत्ययो भवति । भूतवच्च [31]इत्यस्यायमपवादः । उपाध्यायश्चेत् क्षिप्रमागमिष्यति, क्षिप्रं[32] व्याकरणमध्येष्यामहे । वचनग्रहणं पर्यायार्थम् । [33]क्षिप्रम्, शीघ्रम्, आशु, त्वरितम्, अध्येष्यामहे । न इति वक्तव्ये [34]लृड्ग्रहणं लुटोऽपि विषये यथा स्यात् । श्वः क्षिप्रमध्येष्यामहे ॥

## आशंसावचने लिङ् । (१३४/२७९२)

आशंसा येनोच्यते तदाशंसावचनम् । [35]तस्मिन्नुपपदे [36]धातोर्लिङ् प्रत्ययो भवति । भूतवच्च इत्यस्या[37]-यमपवादः । उपाध्यायश्चेदागच्छेत्, [38]आशंसे युक्तोऽधीयीय । आशंसे [39]अवकल्पये युक्तोऽधीयीय । आशंसे क्षिप्रमधीयीय ॥

---

1. ये इत्यधिकम् क. 2. अयमागतः ह. 3. अयमस्मि आगतः ह. 4. एष नास्ति फ. ह. 5. श्वः इत्यधिकम् ड. फ. 6. च इत्यधिकम् ब. 7. प्रकृत्युपपदादिना क. फ. 8. अत्रापि ह. 9. अभिगमिष्यति ग्रामं फ, गमिष्यति ग्रामम् ग. ह. 10. यो हि ह. 11. वर्तमानकाले ग. 12. कालान्तरावगतिस्तु ड. 13. पदसंस्कारायोपयुज्यते क, पदसंस्कारे अ. 14. तं ब. क, तत्तादृशं ह. 15. वाक्यार्थाभिज्ञं फ. ह. 16. करिष्ये क. 17. तु इत्यधिकम् अ. 18. अर्थस्य ग. 19. प्राप्तीच्छा अ. ब. 20. °काले क 21. धातोः नास्ति क. फ, विभाषा अ. 22. चकारात् नास्ति क. फ. 23. एते नास्ति फ. 24. एते इत्यधिकम् अ. 25. एते इत्यधिकम् ह. 26. हि इत्यधिकम् अ. ब. ड. 27. विशेषानतिदेशः तेन अ. ड. 28. लङलिङौ क. 29. उपाध्यायः इत्यधिकम् ड. 30. वाक्यमिदं नास्ति क. ह. फ. 31. अयं नास्ति अ. 32. एते इत्यधिकम् फ. 33. क्षिप्रं नास्ति ह. 34. लृड्वचनं क. 35. आशंसायां गम्यमानायाम् फ. ह. 36. धातोः नास्ति क. फ. ह. 37. अयं नास्ति क. फ. ह. 38. नियुक्तोऽसावाशंसे अ. ड. 39. अवकल्पये नास्ति फ.